देवी सा परमार्थेति वदन्ते भिन्नदर्शिनः ॥ इति"।
"एका सा तु पृथकुत्वेन विना सर्व्वत्र विश्रुता।
यथा तु व्यज्यते वर्णैर्विचित्रैः स्फटिको मणिः ॥
तथा गुणवशाद्देवी नानाभावेषु वर्ण्यते" ॥
इति च देवीपुराणे देवीनिरुक्तं नाम ४५ अध्यायः॥
(अद्वितीया । यथा, मार्कण्डेये ९० । ७ ।
"एकैवाहं जगत्यत्र द्वितीया का ममापरा"।
"अजामेकां लोहितशुक्लकृष्णां"। इति श्रुतिः॥
एकैव । स्त्री । यथा भट्टिः १ । १४ ।
"प्रासोष्ट शत्रुघ्नमुदारचेष्टम्
एका सुमित्रा सह लक्ष्मणेन" ॥)

एकाकी, [न्] त्रि, (एक + "एकादाकिनिचासहाये"। आकिनिच् ।) सहायरहितः। असहायः । एकला इति भाषा। तत्पर्य्यायः। एकः २ एकक ३ । इत्यमरः ॥ एकलः ४ । इति शब्दरत्नावली ॥ (यथा मनुः । ४ । २५८ ।
"एकाकी चिन्तयेन्नित्यं विविक्ते हितमात्मनः।
एकाकी चिन्तयानो हि परं श्रेयोऽधिगच्छति" ॥)

एकाक्षः, पुं, (एकमक्षि यस्य। सक्थ्यक्ष्णोः स्वाङ्गात् षच् ।) काकः । इति शब्दचन्द्रिका ॥ (काकस्य यथा एकनेत्रत्वं जातम्। तत् पाद्मे भरतस्यायोध्यां प्रतिनिवृत्त्यनन्तरमुक्तम् । तद्यथा,—
"राघवश्चित्रकूटाद्रौ सानुजोऽरमत स्त्रिया।
कदाचिदङ्के वैदेह्या निद्राणे रघुनन्दने ॥
ऐन्द्रः काकः समागम्य जानकीं वीक्ष्य कामुकः।
विददार नखैस्तीक्ष्णैः पीनोन्नतपयोधरम् ॥
तत् दृष्ट्वा राघवः क्रुद्धः कुशं जग्राह पाणिना ।
ब्राह्मेणास्त्रेण संयोज्य चिक्षेप ध्वाङ्क्षमारणे ॥
तत् दृष्ट्वा घोरसङ्काशं ज्वलत्कालानलोपमम् ।
दृष्ट्वा काकः प्रदुद्राव निनदन् दारुणस्वनम् ॥
वायसस्त्रिषु लोकेषु बभ्राम भयपीड़ितः ।
यत्र यत्र ययौ काकः शरणार्थी च वायसः ॥
तत्र तत्र तदस्त्रं तु प्रविवेश भयावहम्।
ब्रह्माणमिन्द्रं रुद्रं मां शरणार्थी जगाम सः ॥
तत् दृष्ट्वा वायसं भीतं देवता न ररक्षिम ।
न शक्ताः स्म वयं त्रातुं राघवास्त्राद्भयङ्करात् ॥
इत्यब्रूम महादेवा अन्यथास्त्रं दहेच्च नः ।
पुनस्त्वागात् विधिं काको दयया विधिराह तम् ॥
भो भो बलिभुजां श्रेष्ठ तमेव शरणं व्रज ।
स एव रक्षकः शीघ्रः शरणागतवत्सलः ॥
इत्युक्तः सोऽथ बलिभुक् ब्रह्मणा रघुनन्दनम् ।
उपेत्य सहसा भूमौ निपपात भयातुरः ॥
प्राणसंशयमापन्नं दृष्ट्वा सीता तु वायसम् ।
त्राहि त्राहीति भर्त्तारमुवाच दयिता विभुम् ॥
तच्छिरः पादयोस्तस्य युयुजे चाथ जानकी ।
तमुत्थाप्य करेणाथ कृपापीयूषसागरः ।
ररक्षामौ निशास्त्राय तदेकाक्षि ददौ तदा ॥
वायसोऽपि मुक्तनत्वा सीतायै राघवाय च ।
स्वर्लोकं प्रययौ हृष्टो राघवेणाभिपालितः" ॥)
एकनेत्रविशिष्टे काणे त्रि ॥

एकाग्रः, त्रि, (एकं एकस्मिन् वा अग्रं पुरोगतं ज्ञेयमस्य ।) अनन्यचित्तः। तत्पर्य्यायः। एकतानः २ अनन्यवृत्तिः ३ एकायनः ४ एकसर्गः ५ एकाग्र्यः ६ एकायनगतः ७ । इत्यमरः॥ (यथा, मनुः । १ । १ ।
"मनुमेकाग्रमासीनमभिगम्य महर्षयः"।
"एकाग्रं विषयान्तराव्याक्षिप्तचित्तम्"। इति कुल्लुकभट्टः। तथा भागवते ८ । १६ । ३ ।
"मनस्येकाग्रया बुद्ध्या भगवत्यखिलात्मनि ।
वासुदेवे समाधाय चचार ह परव्रतम्" ॥
तथा गीतायाम् ६ । १२ ।
"तत्रैकाग्रं मनः कृत्वा यतचित्तेन्द्रियक्रियः।
उपविश्यासने युञ्ज्याद्योगमात्मविशुद्धये" ॥
"एकाग्रं विक्षेपरहितं मनः कृत्वा"। इति स्वामिटीका ।) अनाकुलः। इति मेदिनी ॥

एकाग्र्यः, त्रि, (एकं अग्र्यं अस्य ।) एकाग्रः। इत्यमरः॥

एकाङ्गं, क्ली (एकं सुन्दरमङ्गं यस्य। एकं सुन्दरमङ्गं भवत्यस्माद्वा ।) चन्दनम् । इति हारावली ॥ (एकमद्वितीयमङ्गम् । एकस्मिन्नपि अङ्गे। यथा, महाभारते १३ । दानधर्म्मकथने । ८२ । २१ ।
"माननामहमिच्छामि भवत्यः सततं शुभाः ।
अप्येकाङ्गेऽप्यधोवस्तुमिच्छामि च सुकुत्सिते" ॥
एकं श्रेष्ठमङ्गमिति विग्रहे मस्तकम् । अस्य पर्य्याये उत्तमाङ्गशब्ददर्शनात् ॥)

एकाङ्गः, पुं, (एकं सुन्दरम् अङ्गं यस्य। सौम्यत्वादस्य तथात्वम् ।) बुधग्रहः। इति त्रिकाण्डशेषः ॥

एकादश, [न्] त्रि, (एकाधिका दश।) संख्याविशेषः। ११ एगार इति भाषा। तद्वाचकौ। रुद्रः १ दुर्य्योधनसेनापतिः २। इति कविकल्पद्रुमः॥ (यथा मनुः २ । ३६ ।
"गर्भादेकादशे राज्ञो गर्भाच्च द्वादशे विशः" ॥)

एकादशी, स्त्री, (एकादशानां पूरणी। एकादश + डडन्तात् ङीप् ।) तिथिविशेषः। सा तु शुक्लपक्षे सूर्य्यमण्डलात् चन्द्रमण्डलस्य निर्गमरूपैकादशकलाक्रियारूपा। कृष्णपक्षे सूर्य्यमण्डले चन्द्रमण्डलस्य प्रवेशरूपैकादशकलाक्रियारूपा। तत्पर्य्यायः। हरिवासरम् २। हरिदिनम् ३। इति स्मृतिः॥ तत्र जातफलम्।
"क्रोधोत्कटः लोभसहः सुभाषी
यागादिकर्त्ता स्वजनैकभर्त्ता ।
महामतिर्देवगुरुप्रियः स्या-
देकादशीजो मनुजोऽतिहृष्टः" ॥
इति कोष्ठीप्रदीपः ॥ * ॥ तत्र उपवासविधिः। पारणदिने द्वादशीलाभे सर्व्वएव पूर्णां त्यक्त्वा खण्डामुपवसेयुः। तदलाभे गृही पूर्व्वां तदन्यः परां विधवापि उपवसेत् । पूर्णा तु ।
"उदयात् प्राक् यदा विप्र मुहूर्त्तद्वयसंयुता।
संपूर्णैकादशी ज्ञेया तत्रैवोपवसेद् गृही" ॥
इति गारुड़ोक्ता ॥ यदा तु पूर्व्वदिने दशम्या परदिने द्वादश्या युक्तैकादशी तदा उत्तरामुपोष्य द्वादश्यां पारणं कुर्य्यात्। परदिने द्वादश्यनिर्गमे त्रयोदश्यामपि। यदा तु सूर्य्योदयानन्तरं दशमीयुतैकादशी अथ च परदिने न निःसरति तदा तां विहाय द्वादशीमुपवसेत् । यदा तु सूर्य्योदयप्राक्कालीनदशमीविद्धैकादशी परदिने च न निःसरति तदा तामुपवसेत्। यदा तद्विधा सती परदिनेऽपि निःसरति तत्परदिने च द्वादशी तदा तां विहाय खण्डामुपोष्य द्वादश्यां पारयेत् । यदा तूभयदिने तद्विधैकादशी परदिने च न द्वादशी तदा षष्टिदण्डात्मिकां विद्धामुपोष्य परदिने द्वादश्याद्यपादमुत्तीर्य्य पारयेत्। वैष्णवस्तु तत्रापि शुक्लपक्षे परामुपोष्य त्रयोदश्यां पारयेत् । सर्व्वस्यां कृष्णैकादश्यां वैष्णवानां सपुत्त्राणां गृहस्थानामप्युपवासो नित्यः। ब्राह्मणस्य विशेषतो नित्यः। वैष्णवेतरेषां तादृशानां, हरिशयनमध्यवर्त्तिनीषु कृष्णैकादशीषु उपवासो नित्यः। अपुत्त्रवतां गृहिणान्तु सर्व्वास्वेव नित्याधिकारः। काम्योपवासे त्वविशेषेणैव सर्व्वेषामधिकारः। नित्योपवासे रविशुक्रादिदोषो नास्ति। अष्टाब्दादधिको मर्त्योऽपूर्णाशीतिवत्सरो नित्याधिकारी। विधवानान्तु सर्व्वास्वेव नित्याधिकारः तत्र मलमासादिदोषो नास्ति । इत्येकादशीतत्त्वोक्तव्यवस्था ॥ * ॥

अथ हरिभक्तिविलासोक्तैकादशीव्यवस्था लिख्यते। तत्रादौ उपवासपूर्व्वदिनकृत्यम् ।
"प्रातःस्नानादिकं कृत्वा सुवेशो धौतवस्त्रकः।
व्रतं संकल्प्य कुर्व्वीत वैष्णवैश्च महोत्सवम्" ॥
इति कारिका ॥ संकल्पमन्त्रः ।
"दशमीदिनमारभ्य करिष्येऽहं व्रतं तव ।
त्रिदिनं देवदेवेश निर्व्विघ्नं कुरु केशव" ॥ * ॥
तत्र रुक्माङ्गदराजवाक्यं नारदीये ।
"प्रातर्हरिदिनं लोकास्तिष्ठध्वं चैकभोजनाः ।
अक्षारलवणाः सर्व्वे हविष्यान्ननिषेविनः ॥
अवनीतल्पशयनाः प्रियासङ्गविवर्ज्जिताः ।
स्मरध्वं देवमीशानं पुराणं पुरुषोत्तमम्" ॥ * ॥
अथान्यनियमाः । स्कान्दे ।
"कांस्यं मांसं मसूरञ्च क्षौद्रं चानृतभाषणम् ।
पुनर्भोजनमायासं दशम्यां परिवर्ज्जयेत्" ॥
पारणदिनोक्तनिषिद्धद्रव्याण्यत्रापि निषिद्धानि ॥ * ॥
ततो व्रतस्य नित्यत्वमाह कण्वः ।
"एकादश्यामुपवसेन्न कदाचिदतिक्रमेत्" ।
आग्नेयञ्च ।
"उपोष्यैकादशीं राजन् यावदायुःप्रवृत्तिभिः" ॥ * ॥
भोजननिषेधो नारदीये पाद्मोत्तरखण्डे च ।
"रटन्तीह पुराणानि भूयोभूयो वरानने! ।
न भोक्तव्यं न भोक्तव्यं संप्राप्ते हरिवासरे" ॥
पक्षद्वयेऽपि नित्यत्वम् । विष्णुरहस्यम् ।
"शुक्ले वा यदि वा कृष्णे विष्णुपूजनतत्परः।
एकादश्यां न भुञ्जीत पक्षयोरुभयोरपि" ॥ * ॥
संक्रान्त्यादावपि नित्यत्वम् । कात्यायनः ।
"संक्रान्तौ रविवारे वा यदा चैकादशी भवेत् ।
उपोष्या सा महापुण्या सर्व्वपापहरा तिथिः" ॥ * ॥
उपवासदिने श्राद्धनिषेधः । पाद्मोत्तरखण्डे ।
"एकादश्यान्तु प्राप्तायां मातापित्रोर्मृतेऽहनि ।
द्वादश्यां तत्प्रदातव्यं नोपवासदिने क्वचित्" ॥ * ॥
अथ अधिकारिणः । पाद्मोत्तरखण्डे ।
"वर्णानामाश्रमाणाञ्च स्त्रीणाञ्च वरवर्णिनि ।